P. P. Ae. Gunratansuriji M.S. Jin Gun Aaradhak Trust

॥ श्रीः ॥

# सारस्वतादर्शः



संशोधक-शास्त्री हरिशंकर कालीदास. मुंबई.

छपावी प्रसिद्ध करनार.

स्थान झाबुवावाला श्री देवसूरगच्छना यति. पं० रत्नवि-
जयजीना शिष्य पं० जसविजयजी. तच्छिष्य
पं० मोहनविजयजी.

हाल-श्रीगोडीजी महाराजना देरासरमां पाटीयादार.
पायधुनि-मुंबई.

शान्तिविजय प्रिन्टिंग प्रेसमां ईश्वरलाल केशवलाल वकील अने माणेकलाल
माधवजीए छाप्युं. ढींकवा चोकी-अमदावाद.

संवत. १९७४. सन. १९१८.

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

## आ पुस्तक छपाववामां आश्रय आपनार सद्‌गृहस्थोनां नाम.

| | |
|---|---|
| शेठ हिरजी खेतशी | रु. २०१ |
| शेठ पासुभाइ परबत | १५१ |
| शेठ जेपाळभाइ पानाचंद | ५१ |
| शेठ लखमीचंदजी बेद | ५१ |
| शेठ रतनलालजी रतलामवाळा | २५ |
| शेठ सरुपचंद ललुभाइ | २५ |
| शेठ भगवानदास हीराचंद | २५ |
| शेठ केशरीचंद भाणाभाइ | २५ |
| शेठ केशवलाल पूंजाभाइ | २५ |

P. P. Ac. Gunratansuriji M.S.  Jin Gun Aaradhak Trust

# ॥ अथ श्री सारस्वतस्य सूत्रानुक्रमणिका प्रारभ्यते ॥

१ अइउऋऌ समानाः ॥ २ ह्रस्वदीर्घप्लुतभेदाः सवर्णाः–एतेषां ह्रस्वदीर्घप्लुतभेदाः परस्परं सवर्णा भण्यन्ते ॥ ३ ए ऐ ओ औ संध्यक्षराणि ॥ ४ उभये स्वराः–अकारादयः पंच एकारादयश्चत्वारश्चोभये स्वरा उच्यन्ते ॥ ५ अवर्ज्या नामिनः–अवर्णवर्ज्याः स्वरा नामिन उच्यन्ते. ६ हयवरल ॥ ७ ञणनङम ॥ ८ झढधघभ ॥ ९ जडदगब १० छठथखफ ॥ ११ चटतकप ॥ १२ शषस ॥ १३ आद्यंताभ्याम्–प्रत्याहारं जिघृक्षता आद्यंताभ्यामेते वर्णा ग्राह्याः ॥ १४ हसा व्यंजनानि–हकारादयः सकारांता वर्णा हसा व्यंजनानि भवन्ति ॥ १५ कार्यायेत्–प्रत्ययाद्यतिरिक्तः कस्मैचित्कार्यायोच्चार्यमाणो वर्ण इत्संज्ञो भवति ॥ १६ यस्येत्संज्ञा तस्य लोपः ॥ १७ वर्णादर्शनं लोपः ॥ १८ वर्णविरोधो लोपश् ॥ १९ मित्रवदागमः ॥ २० शत्रुवदादेशः ॥ २१ स्वरानन्तरिता हसाः संयोगः ॥ २२ कु चु टु तु पु वर्गाः ॥ २३ अरेदो नामिनो गुणः–नामिन स्थानका अर् ए ओ एते गुणसंज्ञका भवन्ति ॥ २४ आरै औ वृद्धिः–आ आर् ऐ औ एते वृद्धिसंज्ञा भवन्ति ॥ २५ अन्त्यस्वरादिष्टिः–अन्त्यो यः स्वरस्तदादिवर्णष्टिसंज्ञो भवति ॥ २६ अन्त्यात्पूर्व उपधा–अन्त्याद्वर्णमात्रात्पूर्वो यः स उपधासंज्ञो भवति ॥ २७ असंयोगादिपरो ह्रस्वो लघुः ॥ २८ विसर्गानुस्वारसंयोगपरो दीर्घश्च गुरुः ॥ २९ मुखनासिकाभ्यामुच्चार्यमाणो वर्णोऽनुनासिकः ॥ ३० मुखेनोच्चार्यमाणो निरनुनासिकः ॥ ३१ अः इति विसर्जनीयः ॥ ३२ वर्णशिरोविन्दुरनुस्वारः ॥

---

३३ इ यं स्वरे–इवर्णो यत्वमापद्यते स्वरे परे ॥ ३४ हसेऽर्हहसः–स्वरात्परो रेफहकारवर्जितो हसो हसे परे द्विर्भवति ॥ ३५ झभे जबाः–झसाना झभे परे जबा भवन्ति ॥ ३६ स्वरहीनं परेण संयोज्यम् ॥ ३७ राद्यपो द्विः–स्वरपूर्वाद्रेफात्परो यपो द्विर्भवति ॥

* जलतुम्बिकान्यायेन रेफस्योर्ध्वगमनम् ॥ ३८ उ वम्–उवर्णो वत्वमापद्यते स्वरे परे ॥ ३९ ऋ रम्–ऋवर्णो रत्वमापद्यते स्वरे परे ॥ ४० ऌ लम्–ऌवर्णो लत्वमापद्यते स्वरे परे ॥ ४१ ए अय्–एकारो अय् भवति स्वरे परे ॥ ४२ ओ अव्–ओकारो अव् भवति स्वरे परे ॥

* गवादेरवर्णागमोऽक्षादौ वक्तव्यः ॥ ४३ अ इ ए–अवर्ण इवर्णे परे सह ए भवति ॥ ४४ ए ऐ ऐ–अवर्ण एकारे ऐकारे च परे सह ऐकारो भवति ॥ ४५ उ ओ–अवर्ण उवर्णे परे सह ओ भवति ॥ ४६ ओ औ औ–अवर्ण ओकारे औकारे च परे सह औकारो भवति ॥

* क्वचित्स्वरवद्यकारः ॥ ४७ ऐ आय्–ऐकार आय् भवति स्वरे परे ॥ ४८ औ आव्–औकार आवभवति स्वरे परे ॥ ४९ य्वो लोपश् वा पदांते–पदांते स्थितानामयादीनां यकारवकारयोर्लोपश् वा भवति ॥ ५० लोपशि पुनर्न संधिः ॥ छन्दसि तु भवति ॥ ५१

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एदोतोऽतः–पदान्ते स्थितादेकारादोकाराच्च परस्याकारस्य लोपो भवति ॥ ५२ सवर्णे दीर्घः सह–समानस्य सवर्णे परे सह दीर्घो भवति ॥ ५३ हलादेरीषादौ टेर्लोपो वक्तव्यः ॥ ५४ ओमाङावपि–अवर्णात्परौ ओमाङौ टिलोपनिमित्तौ स्तः ॥ ५५ ओमि नित्यम्–ओमि परे नित्यमवर्णस्य लोपो भवति ॥ ५६ ऋ अर्–अवर्ण ऋवर्णे परे सह अर् भवति ॥ ५७ क्वचिदार्–अवर्ण ऋवर्ण परे सह क्वचिदार् भवति ॥ ५८ ऋते च तृतीयासमासे एवाऽऽर् ॥ ५९ उपसर्गादवर्णान्तादकारादौ धातौ आर् भवति ॥ ६० ऋकारादौ नामधातौ वा ॥ ६१ ऋकारादौ आर् नेति वाच्यम् ॥ ६२ लृ अल्–अवर्ण लृवर्णे परे सह अल् भवति ॥ ६३ ऋलृवर्णयोः सावर्ण्यं वक्तव्यम् ॥ ऋलृवर्णस्थानिकत्वाद्रलयोरपि सावर्ण्यं वाच्यम् ॥ ६४ ओष्ठोत्वोर्वौ–अवर्णस्य ओष्ठोत्वोः परयोः समासे सति सह वा ओ भवति ॥

---

६५ नामी–अदसोऽमी संधिं न प्राप्नोति । ६६ य्वे द्वित्वे–इकारान्त ऊकारान्त एकारान्तश्च शब्दो द्वित्वे वर्त्तमानः संधिं न ाति ॥ मणीवादिवर्ज्यम् ॥ ६७ औ निपातः–आकार ओकार निपातः एकस्वरश्च संधिं न प्राप्नोति ॥ ६८ प्लुतः–प्लुतः संधिं न प्राप्नोति ॥ ६९ दूराद्वाने च टेः प्लुतः–दूराद्वाने गाने रोदने विचारे गम्यमाने च टेः प्लुतो भवति ॥ ७० ईइयोः स्वरे संधिर्न वक्तव्यः ॥ ७१ ऋतौ समानो वा–ऋतौ परे समानः संधिं न प्राप्नोति॥

---

७२ चपा अबे जबाः–पदान्ते वर्त्तमानाश्चपा जबा भवन्ति अबे परे ॥ ७३ ञमे ञमा वा–पदान्ते वर्त्तमानाश्चपा ञमे परे ञमा वा भवन्ति ॥ ७४ मयटि नित्यं वाच्यम् ॥ ७५ चपाच्छः शः–चपादुत्तरस्य शकारस्य छो वा भवति अबे परे ॥ ७६ हो झभाः–चपादुत्तरस्य हकारस्य झभा वा भवन्ति ॥ ७७ स्तोः श्चुभिः श्चुः–स्तोः सकारस्य तवर्गस्य च शकारेण चवर्गेण च योगे शकारचवर्गौ यथासंख्येन भवतः ॥ ७८ न शात्–शकारादुत्तरस्य तवर्गस्य चुत्वं न भवति ॥ ७९ ष्टुभिः ष्टुः–स्तोः सकारस्य तवर्गस्य च षकारेण टवर्गेण च योगे षकारटवर्गौ यथासंख्येन भवतः ॥ ८० तोर्लि लः–तवर्गस्य लकारे परे लकारो भवति ॥ ८१ अन्तस्था द्विप्रभेदाः–रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च । तत्र सानुनासिक एव नकारस्य लकारो भवति ॥ ८२ न षि–षकारे परे तवर्गस्य ष्टुत्वं न भवति ॥ ८३ टोरन्त्यात्–पदान्ते वर्त्तमानाट्टवर्गात्परस्य स्तोः ष्टुत्वं न भवति ॥ ८४ नः सक् छते–नान्तस्य पदस्य छते परे सगागमो भवति ॥ ८५ टित्कितावाद्यन्तयोर्वक्तव्यौ ॥ ८६ शे चग्वा–नान्तस्य पदस्य शे परे वा चगागमो भवति ॥ ८७ ङ्णनो ह्रस्वाद्विः स्वरे–ङकारणकारनकारा ह्रस्वादुत्तरा द्विर्भवति स्वरे परे पदान्ते च ॥ ८८ छः–ह्रस्वादुत्तरच्छकारो द्विर्भवति ॥ ८९ खसे चपा झसानाम्–झसानां खसे परे चपा भवन्ति ॥ ९० दीर्घादपि च वक्तव्यः–दीर्घादुत्तरश्छकारो द्विर्भवति ॥ ९१ अपि शब्दाद्दीर्घात्पदान्तादेति वक्तव्यम् ॥ ९२ आङ्माङ्भ्यां च वक्तव्यम् ॥ ९३ मोऽनुस्वारः–पदान्ते वर्त्तमानस्य मकारस्यानुस्वारो भवति हसे परे

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

पदान्ते च ॥ ९४ अवसाने वा–अवसाने मकारस्यानुस्वारो वा भवति ॥ ९५ नश्चापदान्ते झसे–नकारस्य मकारस्य चापदान्ते वर्त्तमानस्यानुस्वारो भवति झसे परे ॥ ९६ अमा यपेऽस्य वा–अनुस्वारस्य अमा वा भवन्ति यपे परे ९७ वा पदान्ते–पदान्ते वर्त्तमानस्यानुस्वारस्य अमा वा भवन्ति यपे परे ॥ ९८ वर्गे वर्गान्तः–वर्गे परे वर्गान्तो भवति । वर्गाभावे पररूपं स्यात् ॥ ९९ मनयवलपरे हकारेऽनुस्वारस्य ते यथाक्रमं भवन्ति १०० ङ्णोः कक्टग्वा शरि–ङकारणकारयोः शषसे परे कक्टकावागमौ वा स्तः ॥ १०१ मः स्वरे–अनुस्वारस्य मकारो भवति स्वरे परे ॥ १०२ ँ छन्दसि–अनुस्वारश्छन्दसि ँकारमापद्यते शषसहरेफेषु परतः ॥ १०३ तकारो लचटवर्गेषु पररूपमापद्यते ॥

---

१०४ विसर्जनीयस्य सः–विसर्जनीयस्य सकारो भवति खसे परे ॥ १०५ शषसे वा–विसर्जनीयस्य वा सकारो भवति शषसे परे ॥ १०६ कुप्वोः ᳵक ᳶपौ वा–विसर्जनीयस्य कवर्गपवर्गसंबन्धिनि खसे परे ᳵक ᳶपौ वा भवतः ॥ १०७ वाचस्पत्यादयः संज्ञाशब्दा निपातात्साधवः ॥ १०८ अन्हो रोऽरात्रिषु–अन्हो विसर्जनीयस्य पदान्ते रो भवति रात्र्यादिवर्जितेषु परतः ॥ १०९ अतोऽत्युः–अकारात्परस्य विसर्जनीयस्य उकारो भवति अति परतः ॥ ११० हवे–अकारात्परस्य विसर्जनीयस्य उकारो भवति हवे परे ॥ १११ आदवे लोपश्–अवर्णात्परस्य विसर्जनीयस्य लोपश् भवत्यबे परे ॥ ११२ स्वरे यत्वं वा–अवर्णात्परस्य विसर्जनीयस्य यत्वं वा भवति स्वरे परे ॥ ११३ भोसः–भोस् भगोस् अघोस् इत्येतस्मात्परस्य विसर्जनीयस्य लोपश् भवत्यबे परे ॥ ११४ नामिनो रः–नामिनः परस्य विसर्जनीयस्य रेफो भवति अबे परे ॥ ११५ रेफप्रकृतिकस्य खपे वा–नामिनः परस्य रेफप्रकृतिकस्य विसर्जनीयस्य खपे परे वा रेफो भवति ॥ ११६ रः–रेफसंबंधिनो विसर्जनीयस्य रेफो भवति अबे परे ॥ ११७ रि लोपो दीर्घश्च–रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः ॥ ११८ सैषाद्धसे–सशब्दादेषशब्दाच्च परस्य विसर्जनीयस्य लोपश् भवति हसे परे ॥ ११९ क्वचिन्नामिनोऽबे लोपश्–नामिनः परस्य विसर्जनीयस्य लोपश् भवति क्वचिदबे परे ॥ १२० आत्खसयोरुः–आकारे खसे च परे विसर्जनीयस्य सह उः क्वचिद्भवति ॥

---

१२१ विभक्त्यन्तं पदम् ॥ १२२ अविभक्ति नाम–विभक्तिरहितं धातुवर्जितं चार्थवच्छब्दरूपं नामोच्यते । १२३ तस्मात्–तस्मान्नाम्नः पराः स्यादयः सप्त विभक्तयो भवन्ति ॥ १२४ स्रोर्विसर्गः–सकाररेफयोर्विसर्जनीयादेशो भवत्यधातो रसे पदान्ते च ॥ १२५ अकाराज्जसोऽसुक् क्वचिद्वक्तव्यश्छन्दसि ॥ १२६ अमशसोरस्य–समानादुत्तरयोरमशसोरकारस्य लोपो भवति अधातोः ॥ १२७ सो नः पुंसः–पुंलिंगात्समानादुत्तरस्य शसः सकारस्य नकारादेशो भवति १२८ शसि–शसि परे पूर्वस्य दीर्घो भवति ॥ १२९ यदादेशस्तद्वद्भवति ॥ १३० टेन–अकारात्परष्टा इन भवति ॥ १३१ अद्भि–अकार आ भवति भकारे परे ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

१३२ भ्यः–अकारात्परस्य भिसो भकारस्याकारो भवति ॥ १३३ अकारस्य भिसि छन्दस्येकारो वक्तव्यः ॥ १३४ ङेरक्–अकारात्परस्य ङे इत्येतस्यागागमो भवति ॥ १३५ ए स्भि बहुत्वे–अकारस्य एत्वं भवति सकारे भकारे च परे बहुत्वे सति ॥ १३६ ङसिरत्–अकारात्परो ङसिरत् भवति ॥ १३७ ङस्स्य–अकारात्परो ङस् स्यो भवति ॥ १३८ ओसि–अकारस्य ओसिपरे एत्वं भवति ॥ १३९ नुडामः–समानात्परस्यामो नुडागमो भवति ॥ १४० नामि–नामि परे पूर्वस्य दीर्घो भवति ॥ १४१ क्विलात्षः सः कृतस्य–कवर्गादिलाच्च प्रत्याहारादुत्तरस्य केनचित्सूत्रेण कृतस्य सकारस्य षकारादेशो भवति । अन्ते स्थितस्य तु न भवति ॥ १४२ आमंत्रणे सिर्धिः–आमंत्रणमाभिमुखीकरणं तस्मिन्नर्थे विहितः सिर्धिसंज्ञो भवति ॥ १४३ समानाद्धेर्लोपोऽधातोः–समानादुत्तरस्य धेर्लोपो भवत्यधातोः । १४४ आभिमुख्याभिव्यक्तये हे शब्दस्य प्राक् प्रयोगः ॥ १४५ जसि–सर्वादेरकारान्तात्परो जस् ई भवति॥

* गुरुः शिच्च सर्वस्य वक्तव्यः ॥ १४६ ष्रनोंणोऽनन्ते–षकाररेफऋवर्णेभ्यः परस्य नकारस्य णकारादेशो भवति अन्ते स्थितस्य न भवति ॥ १४७ अकुप्वन्तरेऽपि–अव प्रत्याहारेण कवर्गेण पवर्गेण च मध्ये व्यवधानेऽपि भवति नान्येन ॥ १४८ सर्वादेः स्मट्–सर्वादेरकारान्तात्परस्य चतुर्थ्येकवचनस्य स्मडागमो भवति ॥ १४९ अतः–सर्वादेरकारान्तात्परस्यातः स्मडागमो भवति ॥ १५० सुडामः–सर्वादेरवर्णान्तात्परस्यामः सुडागमो भवति ॥ १५१ ङिस्मिन्–सर्वादेरकारान्तात्परो ङि स्मिन् भवति ॥ १५२ पूर्वादीनां तु नवानां जस ईकारो वा वक्तव्यः ॥ १५३ पूर्वादिभ्यो नवभ्यो ङसिङ्योः स्मात्स्मिनौ वा वक्तव्यौ १५४ प्रथमचरमतयायडल्पार्धकतिपयनेमानां जसि वा ॥ १५५ मासस्यालोपो वा–मासशब्दस्याकारस्य लोपो वा भवति सर्वासु विभक्तिषु परतः इत्येके ॥ १५६ हसेपः सेर्लोपः–हसान्तादीवन्ताच्च परस्य सेर्लोपो भवति ॥ १५७ आतो धातोर्लोपः–धातुसंबन्धिन आकारस्य लोपो भवतिः शसादौ स्वरे परे ॥ १५८ औ यू–इकारान्तादुकारान्ताच्च परस्य औकारो यू आपद्यते ई ऊ भवतः ॥ १५९ ए ओ जसि–इकारान्तस्य उकारान्तस्य च जसि परे एकार ओकारश्च भवति ॥ १६० धौ–इकारान्तस्य उकारान्तस्य च धिविषये एकार ओकारश्च भवति ॥ १६१ टा नाऽस्त्रियाम्–इकारान्तादुकारान्ताच्च परष्टा ना भवति ॥ १६२ ङिति–इकारान्तस्य उकारान्तस्य च ङिति परे एकार ओकारश्च भवति ॥ १६३ ङस्य–एदोद्भ्यां परस्य ङसिङसोरकारस्य लोपो भवति ॥ १६४ ङेरौ डित्–इदुद्भ्यामुत्तरस्य ङेरौ भवति । स च डित् ॥ १६५ डिति टेः–डिति परे टेर्लोपो भवति ॥ १६६ सेर्डाऽधेः । सखिशब्दस्य सेरधेर्डा भवति ॥ १६७ ऐ सख्युः–सखिशब्दस्यैकारादेशो भवति धिवर्जितेषु पंचसु परेषु ॥ १६८ षष्ठीनिर्दिष्टादेशस्तदन्तस्य ज्ञेयः ॥ १६९ द्विवचनस्यावा छन्दसि–द्विवचनस्यौकारश्छन्दस्याकारमापद्यते ॥ १७० सखिपत्योरिक्–सखिपतिशब्दयोरिगागमो भवति टाङेङिषु परतः ॥ १७१ आगमजमनित्यम्–आगमजं कार्यमनित्यं स्यात् वा छन्दसि ॥ १७२ ऋङ्ङे–सखिपतिशब्दयो

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

र्डागमो भवति ङसिङसोर्ङकारे परे ॥ १७३ ऋतो ङ उः–ऋकारान्तात्परस्य ङसिङसो-रकारस्य उकारो भवति स डित् ॥ १७४ पतिरसमास एव सखिशब्दवद्वक्तव्यः ॥ १७५ त्यदादेष्टेरः स्यादौ–त्यदादेष्टेरकारो भवति स्यादौ परे ॥ १७६ त्रेरयङ्–त्रिशब्दस्यायङादेशो भवति नामि परे ॥ १७७ ङिदन्त्यस्य वक्तव्यः ॥ १७८ डतेश्च–डत्यन्तात्परयो जश्शसोर्लुक् भवति ॥ १७९ लुकि न तन्निमित्तम्–लुकि जाते सति तन्निमित्तं कार्यं न स्यात् ॥ १८० य्वोर्धातोरियुवौ स्वरे–धातोरिकारोकारयोरियुवौ भवतः स्वरे परे ॥ १८१ य्वौ वा–धातोरवयवसंयोगः पूर्वो यस्मादीकारादूकाराच्च नास्ति तदंतस्यानेकस्वरस्य कारकाव्ययपूर्वस्यैकस्वरस्य च धातोरीकारस्य ऊकारस्य च यकारवकारौ भवतः स्वरे परे ॥ १८२ सेनान्यादीनां वामो नुड्वक्तव्यः ॥ १८३ आम् ङेर्नियश्च–आबन्तादीबन्तान्नीशब्दाच्चोत्तरस्य ङेरामादेशो भवति ॥ १८४ सेरा–ऋकारान्तात्परस्य सेरा भवति स च डित् ॥ १८५ अर् पञ्चसु–ऋकारस्यार् भवति पंचसु स्यादिषु परेषु ॥ १८६ ङौ–ऋकारस्यार् भवति ङौ परे ॥ १८७ धेरर्–ऋकारान्तात्परस्य धेरर् भवति स च डित् ॥ १८८ नुर्वा नामि दीर्घः–नृशब्दस्य नामि परे पूर्वस्य दीर्घो वा भवति ॥ १८९ स्तुरार्–सकारतृप्रत्ययसंबंधिन ऋकारस्याऽऽर् भवति पंचसु परेषु ॥ १९० उकारान्तस्यापि क्रोष्टुशब्दस्य पञ्चस्वधिषु तृप्रत्ययान्तता वा वक्तव्या ॥ १९१ तृतीयादौ स्वरादौ तृप्रत्ययान्तता वा वक्तव्या ॥ १९२ रैस्भि–रैशब्दस्याकारादेशो भवति सकारभकारादौ विभक्तौ ॥ १९३ ओरौ–ओकारस्यौकारादेशो भवति पंचसु परेषु ॥ १९४ आम् शसि–ओकारस्यात्वं भवति अमि शसि च परे ॥ १९५ अन्ते गोराम् छन्दसि–ऋगन्ते वर्तमानस्य गोशब्दस्यामो नुडागमो भवति ॥

---

१९६ आपः–आबन्तात्परस्य सेर्लोपो भवति ॥ १९७ औरी–आबन्तात्पर औरीकारमापद्यते ॥ १९८ धिरिः–आबन्तात्परो धिरिर्भवति ॥ १९९ टौसोरे–आबन्तस्य टौसोः परयोरेत्वं भवति ॥ २०० ङिता यट्–आबन्तात्परेषां ङेङसिङस्ङि इत्येतेषां ङितां वचनानां यडागमो भवति ॥ २०१ अंबादीनां धौ ह्रस्वः–अंबादीनां धौ परे ह्रस्वो भवति ॥ २०२ डलकवतीनां न–डलकवतीनां अंबादीनां धौ परे ह्रस्वो भवति ॥ २०३ आबन्तः स्त्रियाम्–अकारान्तान्नाम्नः स्त्रियां वर्त्तमानादाप् प्रत्ययो भवति ॥ २०४ यटोच्च–आबन्तात्सर्वादेः परस्य यटः सुडागमो भवति पूर्वस्य चापोऽकारो भवति ॥ २०५ जरायाः स्वरादौ जरस् वा वक्तव्यः ॥ २०६ भिस् ऐस् वक्तव्यः ॥ २०७ इदुद्भ्याम्–स्त्रियां वर्त्तमानाभ्यामिकारोकाराभ्यां परेषां ङितां वचनानां वा अडागमो भवति २०८ स्त्रियां य्वोः–इवर्णान्तादुवर्णान्ताच्च स्त्रियां वर्त्तमानात्परस्य ङेरामादेशो भवति ॥ २०९ ङितामट्–स्त्रियां वर्त्तमानादिकारान्तादुकारान्ताच्च परेषां ङितां वचनानामडागमो भवति ॥ २१० धौ ह्रस्वः–इयुवस्थानवर्जितयोरधात्वोरीदूतो स्त्री शब्दस्य च स्त्रियां धौ परे ह्रस्वो भवति ॥ २११ क्रोष्टुः स्त्रियां तृवद्भावः स्यात् ॥ २१२ स्त्रीभ्रुवोः–स्त्री शब्दस्य भ्रूशब्दस्य च इयुवौ भवतः स्वरे परे ॥ २१३ वामशसि–स्त्री शब्दस्य अमि शसि

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

च परे वा इय् भवति ॥ २१४ वेयुवः—इयुवन्तात्स्त्रियां वर्त्तमानात्परेषां ङितां वचनानां वा अडागमो भवति । न तु स्त्री शब्दस्य विकल्पेन ॥
* श्यादीनां वामो नुट् वक्तव्यः ॥

---

२१५ अतोऽम्—अकारान्तान्नपुंसकलिङ्गात्परयोः स्यमोरम् भवत्यर्थौ ॥ २१६ ईमौ—नपुंसकलिङ्गात्परं औ ईकारमापद्यते ॥ २१७ जश्शसोः शिः—नपुंसकलिङ्गात्परयोर्जश्शसोः शिर्भवति ॥ २१८ गुरुः शिच सर्वस्य वक्तव्यः ॥ २१९ नुमयमः—नपुंसकस्य नुमागमो भवति शौपरे ॥ २२० मिदन्त्यात्स्वरात्परो वक्तव्यः ॥ २२१ नोपधायाः—नान्तस्योपधाया दीर्घो भवति शौ परे ॥ २२२ स्वन्यादेः—अन्यादेर्गणात्परयोः स्यमोश्र्तु भवति ॥ २२३ नपुंसकस्य—नपुंसकस्य ह्रस्वो भवति सर्वासु विभक्तिषु परतः ॥ २२४ नपुंसकात्स्यमोर्लुक्—नपुंसकलिङ्गात्परयोः स्यमोर्लुग्भवति ॥ २२५ नामिनः स्वरे—नाम्यन्तस्य नपुंसकस्य नुमागमो भवति विभक्तिस्वरे परे ॥ २२६ अचास्थ्नां शसादौ—अस्थ्यादीनां शसादौ नुमागमो भवति पूर्वस्य इकारस्य चाकारादेशो भवति शसादौ स्वरे परे ॥ २२७ अल्लोपः स्वरेम्वयुक्ताच्छसादौ—नान्तस्योपधाया अकारस्य लोपो भवति शसादौ स्वरे तद्धिते ईपि ईकारे च । मकारवकारान्तसंयोगादुत्तरस्य न भवति ॥ २२८ वेङ्योः—नान्तस्योपधाया ईङ्योः परयोर्वा अकारस्य लोपो भवति ॥ २२९ स्थूणां नपुंसके धौ वा गुणो भवति ॥ २३० नपुंसकस्य—नपुंसकस्य ह्रस्वो भवति ॥ २३१ टादावुक्तपुंस्कं पुंवद्वा—उक्तपुंस्कंनाम्यंतं नपुंसकलिङ्गं टादौ स्वरे परे पुंवद्वा भवति ॥ २३२ ह्रस्वादेशे संध्यक्षराणामिकारोकारौ च वक्तव्यौ ॥

---

२३३ पञ्चस्वनडुहः—पञ्चसु वचनेष्वनडुह आमागमो भवति शौ च ॥ २३४ सावनडुहः—अनडुह्शब्दस्य सौ परे नुमागमो भवति ॥ २३५ संयोगान्तस्य लोपः—संयोगान्तस्य लोपो भवति रसे पदान्ते च ॥ २३६ वसां रसे—वस् स्रंस् ध्वंस् अनडुह् इत्येतेषां रसे पदान्ते च दत्वं भवति ॥ २३७ धावम्—अनडुह्शब्दस्य धौ परे अमागमो भवति ॥ २३८ दादेर्घः—दादेर्धातोर्हकारस्य घत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ २३९ आदिजबानां झभान्तस्य झभाः स्ध्वोः—धातोर्झभान्तस्यादौ वर्त्तमानानां जबानां झभा भवन्ति सकारे ध्वशब्दे च परे नाम्नश्च रसे पदान्ते च ॥ २४० वावसाने—अवसाने वर्त्तमानानां झसानां जबा भवन्ति चपा वा ॥ २४१ विरामोऽवसानम्—वर्णानामभावोऽवसानसंज्ञः स्यात् ॥ २४२ कषसंयोगे क्षः—ककारषकारसंयोगे क्ष इत्यक्षरं भवति ॥ २४३ होढः—हकारस्य ढत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ २४४ द्रुहादीनां घत्वढत्वे वा—द्रुह् मुह् स्नुह् स्निह् इत्येतेषां हकारस्य घत्वढत्वे वा भवतः धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ २४५ वाहो वौ शसादौ स्वरे—वाहो वकारस्यौकारादेशो भवति शसादौ स्वरे परे ॥ २४६ श्वेतवाह् उक्थशास् पुरोडाश् अवयाजां डस् रसे पदान्ते चेति वक्तव्यम् ॥ २४७ सहे षः साढि—सहे सकारस्य

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

षकारादेशो भवति सादि सति ॥ २४८ चतुराम् शौ च–चतुर् शब्दस्यामागमो भवति धिव-र्जितेषु पंचसु परेषु शौ च परे ॥ २४९ रः संख्यायाः–रेफांतसंख्यायाः परस्यामो नुडागमो भवति । २५० रः सुपि–सप्तमी बहुवचने रारेव विसर्जनीयो नान्यरेफस्य ॥ २५१ धात्वम्–चतुर्शब्दस्य धौ परे अमागमो भवति ॥ २५२ नाम्नो नो लोपशधौ–नाम्नो नकारस्यानागमजस्य लोपश् भवति रसे पदान्ते चाधो ॥ २५३ जञोज्ञः–जकारञकारसंयोगे ज्ञ इत्यक्षरं भवति ॥ २५४ श्वादेर्व उः–श्वादेर्वकार उत्वं प्राप्नोति शसादौ स्वरे परे तद्धिते ईपि ईकारे च ॥ २५५ मघवा बहुलम्–मघवन् शब्दस्य वा तृ इत्यंतादेशः स्यात् ॥ २५६ अर्वणस्त्रसाव नञः–नञ्वर्जस्यार्वणस्तृ इत्यन्तादेशः स्यादसौ विभक्तौ परतः ॥ २५७ इतोऽत्पंचसु–पञ्चसु स्यादिषु पथ्यादीनामिकारस्याकारो भवति ॥ २५८ थो नुट्–पथ्यादीनां थकारस्य नुडागमो भवति पञ्चसु स्यादिषु परेषु ॥ २५९ आ सौ–पथ्यादीनां टेरात्वं भवति सौ परे ॥ २६० पथां टेः–पथ्यादीनां टेर्लोपो भवति शसादौ स्वरे परे तद्धिते ईपि ईकारे च ॥ २६१ इनां शौ सौ–इन् हन् पुषन् अर्यमन् इत्येतेषां शौ सौ चाधौ परे उपधाया दीर्घो भवति ॥ २६२ हनो घ्ने–हन्तेर्धातोर्हकारस्य घत्वं भवति अव्यवधाने नकारे परे व्यवधाने ञिति णितिच परे ॥ २६३ हन्तेरत्पूर्वस्य–हन्तेरकारपूर्वस्यैव नस्य णत्वं स्यान्नान्यस्य ॥ २६४ जश्शसोर्लुक्–षकारनकारान्तसंख्यायाः परयोर्जस्शसोर्लुग्भवति ॥

२६५ लुकि न तन्निमित्तम्–लुकि सति तन्निमित्तं कार्यं न स्यात् ॥ २६६ ष्णः–षकारनकारान्तसंख्यायाः परस्यामो नुडागमो भवति ॥ २६७ अष्टनो डौ वा–अष्टन्शब्दात्परयोर्जस् शसोर्वा डौ भवति ॥ २६८ वासु–अष्टन्शब्दस्य आसु विभक्तिषु परासु वा टेरात्वं भवति ॥ २६९ इदमोऽयं पुंसि–इदम्शब्दस्य पुंसि विषये अयमादेशो भवति सिसहितस्य ॥ २७० दस्य मः–त्यदादीनां दकारस्य मत्वं भवति स्यादौ परे ॥ २७१ अन टौसोः–इदमोऽनादेशो भवति टौसोः परयोः कृत्स्नस्य ॥ २७२ स्भ्यः–इदमः सकारे भकारे च परे अकारादेशो भवति कृत्स्नस्य ॥ २७३ भिस् भिस्–इदमदसोर्भिस् भिस्येव भवति ॥ २७४ इदमोऽप्यन्वादेशे द्वितीयाटौस्स्वेनादेशो वक्तव्यः ॥ २७५ मो नो धातोः–धातोर्मकारस्य नकारादेशो भवति रसे पदान्ते च ॥ २७६ छशषराजादेः षः । छकारान्तस्य शकारान्तस्य षकारान्तस्य च राज् यज् स्रज् मृज् भ्राजादेश्च षकारो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥

२७७ षोढः–षकारस्य डत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदांते च ॥ २७८ मो राजि समः क्वौ–क्विबन्ते राजतौ परे समो मस्य म एव स्यात् । २७९ युजे रसमासे–युजेः सुटि नुम् स्यादसमासे ॥ २८० क्विन्प्रत्ययस्य कुः–क्विन्नन्तस्य धातो कवर्गान्तादेश स्यादसमासे झलि पदान्ते च ॥ २८१ पादः पत्–पादशब्दस्य पदादेशः स्याच्छसादौ स्वरे परे तद्धिते ईपि ईकारे च ॥ २८२ स्तः–त्यदादेस्तकारस्य सत्वं भवति सौ परे ॥ २८३ एतदोन्वादेशे द्वितीयाटौस्वेनो वा वक्तव्यः ॥ २८४ अञ्चेः पञ्चसु नुमागमो वक्तव्यः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

२८५ चोः कुः–चवर्गस्य कवर्गादेशो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च यथा-संख्येन ॥ २८६ अञ्चेर्दीर्घश्च–अञ्चतेरकारस्य लोपो भवति पूर्वस्य च दीर्घः शसादौ स्वरे परे तद्धिते प्रत्यये ईपि ईकारे च ॥ २८७ नाञ्चेः पूजायाम्–पूजार्थस्याञ्चतेरुपधाभूतस्य नस्य लोपो न स्यात् ॥ २८८ तिरश्चादयः–तिरश्चादयः शब्दा निपात्यन्ते शसादौ स्वरे परे तद्धिते ईपि ईकारे च ॥ २८९ विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये–अनयोः सर्वनाम्नश्च टेर-द्र्यादेशः स्याद्वप्रत्ययान्तेऽञ्चतौ परे ॥ २९० अदसोऽसेर्दादु दो मः–अदसोऽसान्तस्य दात्पर-स्य उदूतौ स्तो दस्य च मः स्यात् ॥ २९१ उद ईत्–उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर-कारस्येकारादेशो भवति शसादौ स्वरे परे तद्धिते ईपि ईकारे च ॥ २९२ ऋितो नुम्–उका-रानुबंधस्य ऋकारानुबंधस्य नुमागमो भवति पुंसि पञ्चसु परेषु ॥ २९३ न्सम्महतोऽधौ दीर्घः शौ च–न्सन्तस्याप्शब्दस्य महच्छब्दस्य च दीर्घो भवति पञ्चसु परेषु धिवर्जितेषु शौ च परे ॥ २९४ अत्वसोः सौ–अत्वन्तस्यासन्तस्य च दीर्घो भवति धिवर्जिते सौ परे ॥ २९५ द्विरू-क्तानां जक्षादीनां च शतुर्नुम्प्रतिषेधः पुंलिङ्गे नित्यं वक्तव्यो नपुंसके वा शौ च ॥ २९६ डु णः–संख्यासंबन्धिनो डकारस्य णत्वं भवति नामि परे ॥ २९७ दोषां रः । दोष्सजुष्आ-शिष्हविष्प्रभृतीनां षकारस्य रेफो भवति रसे पदान्ते च ।

* शसादावनन्तता वा वक्तव्या ॥ २९८ सजुषाशिषो रसे पदान्ते च दीर्घो वक्तव्यः ॥ २९९ पुंसोऽसुङ् । पुंस्शब्दस्य असुङादेशः भवति पञ्चसु परेषु शौ च ॥ ३०० असंभवे पुंसः ककुसौ । असंभव इति कोऽर्थः । वेदान्तैकवेद्यस्य परमात्मनो बहुत्वासंभवे वाच्ये सति पुंस्शब्दस्य कगागमो भवति सुपि परे ॥ ३०१ स्कोराद्योश्च–संयोगाद्योः सकारककारयो र्लोपो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ ३०२ वसोर्व उः–वसोः संबन्धी वकार उत्वमाप्नोति शसादौ स्वरे परे तद्धिते ईपि ईकारे च ॥ ३०३ उशनसाम्–उशनस् पुरुदं-शस् अनेहस् इत्येतेषां सेरघेर्डा भवति ॥ ३०४ सौ सः–अदसो दकारस्य सौ परे सत्वं भवति ॥ ३०५ सेरौ–अदसः सेरौकारादेशो भवति । ३०६ दस्य मः–त्यदादीनां दकार-स्य मत्वं भवति स्यादौ परे ॥ ३०७ मादू–अदसो मकारात्परस्य ह्रस्वस्य ह्रस्व उकारादेशो भवति दीर्घस्य च दीर्घ ऊकारादेशो भवति ॥ ३०८ एरी बहुत्वे–बहुत्वे सति मकारात्परस्य अदस एकारस्य ईकारादेशो भवति ॥ ३०९ सामान्ये अदसः कः स्यादिवच्च–सामान्येऽर्थे वाच्ये सति अदस्शब्दात्परः कः प्रत्ययो भवति सः स्यादिवज्ज्ञेयः ॥

---

३१० नहो धः–नहो हकारस्य धकारादेशो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ ३११ दिव औ–दिवो वकारस्य औकारादेशो भवति सौ परे ॥ ३१२ वामि–दिवो वकारस्य वा आत्वं भवति अमि परे ॥ ३१३ उ रसे–दिवो वकारस्य उकारादेशो भवति रसे पदान्ते च ॥ ३१४ त्रिचतुरोः स्त्रियां तिसृचतसृवत् स्त्रियां वर्तमानयोस्त्रीचतुर्शब्दयो-स्तिसृ चतसृ इत्येतावादेशौ भवतः ॥ ३१५ न तिसृचतसृनामि दीर्घः छन्दसि

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वा दीर्घत्वम् ॥ ३१६ र्वोर्विहसे—धातोरिकारोकारयो दीर्घो भवति रेफवकारयोर्हस-परयोः॥ ३१७ इयं स्त्रियाम्—इदम्शब्दस्य स्त्रियामियं भवति सिसहितस्य ॥ ३१८ भिद्-पाम्—अवादीनां भकारे परे दत्वं भवति ॥ ३१९ दिशाम्—दिश् दृश् स्पृश् इत्यादीनां रसे पदान्ते च कुत्वं भवति ॥ ३२० सजुषाशिषो रसे पदान्ते च दीर्घो वक्तव्यः ॥

३२१ अन्हः सः—अहन्शब्दस्य नकारस्य सकारो भवति रसे पदान्ते च ॥ ३२२ संबोधने नपुंसकानां नलोपो वा वक्तव्यः ॥ ३२३ नान्तादन्नाच्छन्दसि ङिस्योर्वा लोपो वक्तव्यः ॥ ३२४ छन्दस्यागमजानागमजयोर्लोपालोपौ च वक्तव्यौ ॥ ३२५ इदमेतदोर्द्वितीयैकवचने नपुंसके एनद्वा वाच्यः ॥

३२६ त्वमहं सिना—सिसहितयोर्युष्मदस्मदोस्त्वमहमित्येतावादेशौ भवतो यथासं-ख्येन ॥ ३२७ युवावौ द्विवचने—युष्मदस्मदोर्द्विवचने परे युवआव इत्येतावादेशौ भवतः ॥ ३२८ आमौ—युष्मदस्मदोः पर औ आम् भवति ॥ ३२९ यूयं वयं जसा—जसासहितयोर्युष्म-दस्मदोर्यूयं वयमित्येतावादेशौ भवतः ॥ ३३० त्वन्मदेकत्वे—युष्मदस्मदोः त्वन्मदित्येतावा-देशौ भवत एकत्वे गम्यमाने ॥ ३३१ आम्सौ—युष्मदस्मदोष्टेरात्वं भवति अमि सकारे भि-सि च परे ॥ ३३२ शसो नो वक्तव्यः ॥ ३३३ ए टाङ्योः—युष्मदस्मदोष्टेरेत्वं भवति टाङि इत्येतयोः परयोः ॥ ३३४ तुभ्यं मह्यं ङया—ङया सहितयोर्युष्मदस्मदो स्तुभ्यं मह्यं इत्येता-वादेशौ भवतः ॥ ३३५ भ्यस् श्भ्यम्—युष्मदस्मदोः परो भ्यस् श्भ्यं भवति ॥ ३३६ ङसि-भ्यसोः श्तुः—पञ्चम्या ङसिभ्यसोः श्तुर्भवति ॥ ३३७ तव मम ङसा—ङसा सहितयोर्युष्मद स्मदोस्तव मम इत्येतावादेशौ भवतः ॥ ३३८—साम्आकं—युष्मदस्मदोः परः साम् आकं भवति॥ ३३९ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेमे वां नौ वस्नसौ—युष्मदस्मदोर्यथासंख्ये-नामी आदेशाः स्युः ॥ ३४० त्वामामा—अमासहितयोर्युष्मदस्मदोस्त्वामा इत्येतावादेशौ भवतः ॥ ३४१ नादौ—पादादौ वर्त्तमानयोर्युष्मदस्मदोर्नैते आदेशा भवन्ति॥ ३४२ पदात्प-रयोरनयोरेते आदेशा वक्तव्याः॥ ३४३ एते आदेशा अन्वादेशे नित्यमनन्वादेशे वा वक्तव्याः ॥ ३४४ विद्यमानपूर्वात्प्रथमान्तात्परयोरनयोरन्वादेशेऽप्येते आदेशा वा वक्तव्याः ॥ ३४५ अचाक्षुषज्ञानार्थधातूनां योगे नैते आदेशा वक्तव्याः ॥ ३४६ विशेष्यपूर्वं संबोधनेतरपूर्वं संबो-धनं हित्वा अन्यस्मात्संबोधनात्परयोर्नैते आदेशा भवन्ति ॥ ३४७ चादिभिश्च—चादिभिरपि योगे नैते आदेशा भवन्ति ॥ ३४८ चादिर्निपातः—चादिरित्येवमादिर्गणो निपातसंज्ञो भवति ३४९ तत्रादिर्विभक्त्यर्थे निपात्यते ॥ ३५० आहिश्च दूरे—दूरेऽर्थे वाच्ये सति आहिप्र-त्ययो भवति ॥ ३५१ किमः सामान्ये चिदादिः—सर्वविभक्त्यन्तात्किंशब्दात्सामान्येऽर्थे चित् चन च इत्येते प्रत्यया भवन्ति ॥ ३५२ तदधीनकार्त्स्न्ययोर्वा सात्—तदधीनार्थे कार्त्स्न्यार्थे वा सात्प्रत्ययो भवति ॥ ३५३ ऊर्युररर्यङ्गीकरणे ॥ ३५४ सद्यादिः काले निपात्यते ॥ ३५५ सादि-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

रुपसर्गः—अयं गण उपसर्गसंज्ञकः ॥ ३५६ प्राग्धातोः—उपसर्गा धातोः प्राक् प्रयोक्तव्याः ॥ ३५७ तदव्ययम्—तदिदं स्वादिचादिशब्दरूपमव्ययसंज्ञं भवति ॥ ३५८ क्त्वाद्यंतं च—क्त्वाद्यंतं शब्दरूपमव्ययसंज्ञं भवति ॥ ३५९ अव्ययाद्विभक्तेर्लुक्—अव्ययात्परस्या विभक्तेर्लुग् भवति ॥ ३६० न शब्दनिर्देशे-अव्ययानां शब्दत्वेन रूपनिर्देशे सति विभक्तेरलुग्भवति ॥

३६१ अजादेश्चाप् वक्तव्यः ॥ ३६२ काप्यतः—स्त्रियां कापि परे पूर्वस्याकारस्य इकारो भवति ॥ ३६३ ह्रस्वो वा स्त्रियाम्— आपि परे तरादौ च पूर्वस्य ह्रस्वो वा भवति ॥ ३६४ तरतः पूर्वस्य पुंवत् ॥ ३६५ आबन्तस्यानाबन्तस्यापि कप्रत्यये परे बहुव्रीहौ वा ॥ ३६६ न्रण ईप्—नकारान्तादृकारान्तादणन्ताच्च स्त्रियामीप्प्रत्ययो भवति ॥

*ईपि राज्ञः अलोपो वक्तव्यः ॥

३६७ यस्य लोपः इश्च अश्च यः तस्य लोपो भवति स्वरे यकारे च परे ॥ ३६८ स्वस्त्रादीनामन्नन्तानां संख्यावाचिनां च नेप् वक्तव्यः ॥ ३६९ पादन्तात्स्त्रियामीप् वा वक्तव्यः ॥ ३७० ऋचि पादन्तादाबेव वक्तव्यो न ईप् ॥ ३७१ अन्नन्ताद्बहुव्रीहेर्ईप् वा वाच्यः ॥ ३७२ उपधालोपिनोऽन्नन्ताद्बहुव्रीहेरीप् वा ॥ ३७३ संख्यादेर्ह्नः ईप् ॥ ३७४ ष्ठितः—षकार ऋकार उकार ऌकारानुबन्धाच्च स्त्रियामीप् प्रत्ययो भवति ॥ ३७५ धातो रुदितो न ॥ ३७६ अप्ययोरान्नित्यम्—अप्प्रत्ययप्रत्ययसंबन्धिनोऽकारात्परस्य शतुर्नित्यं नुमागमो भवति ईकारे ईपि च परे ॥ ३७७ वादीपोः शतुः—अवर्णात्परस्य शतुर्वा नुमागमो भवति ईकारे ईपि च परे ३७८ नदादेः—नदादेर्गणात्स्त्रियामीप् प्रत्ययो भवति ॥ ३७९ ईप्यनडुहो वाम् वक्तव्यः ॥ ३८० हायनाद्वयसि च ॥ ३८१ पुरुषाद्वा परिमाणे ॥ ३८२ इन्द्रादेरानीप् च—इन्द्रादेर्गणात्स्त्रियामानीप् प्रत्ययो भवति ॥

* चकारान्मातुलाचार्यसूर्योपाध्यायार्यक्षत्रियेभ्यो वा ॥

३८३ ब्रह्मन् शब्दस्य न लोपो वाच्यः ॥ ३८४ अर्यक्षत्रियाभ्यां वा स्वार्थे ॥ ३८५ हिमारण्ययोराधिक्ये आनीप् प्रत्ययो भवति ॥ ३८६ यवाद्दोषे ॥ ३८७ यवनाल्लिप्याम् ॥ ३८८ ईप् समाहारे गुणश्च ॥ ३८९ पुंयोगे च—पुंयोगे च स्त्रियामीप्प्रत्ययो भवति ॥३९० गोपालिकादीनां न॥ ३९१सूर्याद्देवतायां चाप् ३९२जातेरयोपधात्—जातिवाचिनोऽयकारोपधादकारान्तात्स्त्रियामीप्प्रत्ययो भवति ॥ ३९३ गवयहयमुकयमनुष्याणां न निषेधः ॥ ३९४ शूद्राज्जातौ न॥ ३९५ महत्पूर्वात्तु ईप् ॥ ३९६ प्रथमवयोवाचिनोऽत ईप् वक्तव्यः कन्याशब्दात्तु ॥ ३९७ स्वाङ्गाद्वा—स्वाङ्गवाचिनो वा स्त्रियामीप्प्रत्ययो भवति ॥ ३९८ नखमुखयोश्च संज्ञायां नेप् ॥ ३९९ नासिकाशब्दात्केवलान्नेप् ॥ ४०० क्रादिकारादक्तेरीप् वा वक्तव्यः ॥ ४०१ ऐ च मन्वादेः—मन्वादेर्गणात्स्त्रियामीप् प्रत्ययो भवति एकारादेशश्च ॥ ४०२ पत्न्यादयः—पत्न्यादयः शब्दा निपात्यन्ते ॥ ४०३ र्णापि परे नुर्वृद्धिर्वाच्या ॥ ४०४ वोर्गुणात्—उकारान्ताद्गुणवा-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

चिनो वा क्रियायोग् प्रत्ययो भवति ॥ ४०५ खरुसंयोगोपधान्न ॥ ४०६ उतऊः–उकारान्ताद्वा ऊप्रत्ययो भवति ॥ ४०७ यूनस्तिः–युवन्शब्दात्स्त्रियां तिप्रत्ययो भवति ॥

४०८ लिङ्गार्थे प्रथमा–धातुप्रत्ययातिरिक्तमर्थवच्छद्धरूपं लिङ्गं तस्यैवार्थे सन्मात्रे प्रथमा विभक्तिर्भवति ॥ ४०९ आमंत्रणे च–आमंत्रणे अभिमुखीकरणे प्रथमा विभक्तिर्भवति ॥ ४१० भोस् भगोस् अघोस्–एते शद्धा निपात्यन्ते विविषये ॥ ४११ शेषाः कार्ये–कर्तृसाधनयोर्दानपात्रे विश्लेषावधौ संबंध आधाराभावयोः शेषा विभक्तयो द्वितीयाद्या एष्वर्थेषु भवन्ति॥ ४१२ कर्तुरीप्सिततमं कर्म–कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् ॥ ४१३ तथा युक्तं चानीप्सितम्–ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् ॥ ४१४ उपर्यध्यधसः सामीप्ये–एषां द्वे स्तो देशतः कालतश्च सामिप्ये ॥ ४१५ तस्य परमाम्रेडितम्–द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात् ॥ ४१६ परितः समयानिकषाहाप्रतियोगेऽपि ॥ ४१७ लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः–एष्वर्थेषु विषयभूतेषु प्रत्यादयः कर्मप्रवचनीयसंज्ञाः स्युः ॥ ४१८ कर्मप्रवचनीययुक्ते द्वितीया–एतेन योगे द्वितीया स्यात् ॥ ४१९ कालाध्वनो नैरंतर्ये–कालाध्ववाचकशद्धानां नैरंतर्येऽर्थे वाच्ये सति द्वितीया विभक्तिर्भवति ॥ ४२० कर्तरि प्रधाने क्रियाश्रये साधने च–प्रधाने कर्तरि क्रियासिध्युपकारके करणेऽर्थे च तृतीया विभक्तिर्भवति ॥ ४२१ प्रकृत्यादिभ्यः–प्रकृत्यादिभ्यः शद्धेभ्यस्तृतीया स्यात् ॥ ४२२ दानपात्रे संप्रदानकारके चतुर्थी ॥ ४२३ क्रियया यमभिप्रैति सोऽपि संप्रदानम् ॥ ४२४ विश्लेषावधौ पंचमी ॥ ४२५ संबन्धे षष्ठी ॥ ४२६ आधारे सप्तमी ॥ ४२७ भावे सप्तमी ॥ ४२८ विनासहनमस्कृतेनिर्धारणस्वाम्यादिभिश्च–एतैरपि योगे द्वितीयाद्या विभक्तयो भवन्ति ॥ ४२९ अधिशीङ्स्थासां कर्म–अधिपूर्वाणामेषामाधारः कर्मसंज्ञः स्यात् ॥ ४३० अभिनिविशश्च–अभिनीत्येतत्संघातपूर्वस्य विशतेर्धातोराधारः कर्मसंज्ञः स्यात् ॥ ४३१ उपान्वध्याङ्वसः–उपादिपूर्वस्य वसतेराधारः कर्मसंज्ञः स्यात् ॥ ४३२ सहादियोगे तृतीयाऽप्रधाने ॥ ४३३ अशिष्टव्यवहारे दाणस्य प्रयोगे चतुर्थ्यर्थे तृतीया ॥ ४३४ वारणार्थयोगे तृतीया ॥ ४३५ नमःस्वस्तिस्वाहास्वधालंवषट्योगे चतुर्थी ॥ ४३६ रुच्यर्थानां प्रीयमाणः–रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः संप्रदानसंज्ञः स्यात् ॥ ४३७ ऋत आदियोगे पंचमी ॥ ४३८ ऋते योगे द्वितीयापि ॥ ४३९ यतश्च निर्धारणम्–द्रव्यगुणक्रियाजातिभिः समुदायात्पृथक्करणं यतस्तत्र षष्ठीसप्तम्यौ स्तः ॥ ४४० स्वाम्यादिभिश्च–स्वाम्यादिभिरपि योगे षष्ठीसप्तम्यौ स्तः ॥ ४४१ कर्तृकार्ययोरक्तादौ कृति षष्ठी–कर्तरि कार्ये च षष्ठी विभक्तिर्भवति क्तादिवर्जितकृदन्ते शद्धे प्रयुज्यमाने ॥ ४४२ उभयप्राप्तौ कर्मणि–उभयोः प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात् ॥४४३ स्मृता च कार्ये–स्मृत्यर्थे धातौ प्रयुज्यमाने च कार्ये षष्ठी भवति ॥ ४४४ न लोकाव्ययनिष्ठाखलर्थतृनाम्–एषां प्रयोग षष्ठी न ॥ ४४५ हेतौ तृतीया पञ्चमी च वक्तव्या ॥ ४४६ भयहेतौ

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

पञ्चमी च वक्तव्या ॥ ४४७ षष्ठी च हेतुप्रयोगे–हेतुप्रयोगे हेतौ द्योते षष्ठी स्यात् ॥ ४४८ इत्थं भावे तृतीया ॥ ४४९ येनाङ्गविकारः–येन विकृतेनाङ्गेनाङ्गिनोऽङ्गविकारो लक्ष्यते तस्मादङ्गा तृतीया विभक्तिर्भवति ॥ ४५० जनिकर्तुः प्रकृतिः–जायमानस्य कार्यस्योपादानमपादानसंज्ञं भवति ॥ ४५१ आङ्गादियोगे च–आङ्गादियोगे पञ्चमी विभक्तिर्भवति ॥ ४५२ तादर्थ्ये चतुर्थी वक्तव्या ॥४५३ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः–क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स संप्रदानसंज्ञकः स्यात् ॥ ४५४ सोपसर्गयोः क्रुधद्रुहोर्योगे द्वितीया वक्तव्या ॥ ४५५ क्यब्लोपे कर्मण्यधिकरणे च पञ्चमी वक्तव्या ॥४५६ विषये च ॥

* षष्ठीसप्तम्यौ चानादरे ॥

४५७ अन्योक्ते प्रथमा–यदिदं कार्यादन्येनाख्यातेन कृता चोक्तं भवति तदा प्रथमा प्रयोक्तव्या ॥ ४५८ छन्दसि स्यादिः सर्वत्र ॥ ४५९ स्वतन्त्रः कर्ता–क्रियायां स्वातंत्र्येण विवक्षितोऽर्थः कर्ता स्यात् ॥ ४६० साधकतमं करणं–क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्॥ ४६१ कर्तृकरणयोस्तृतीया–अनभिहिते कर्तरि करणे च तृतीया स्यात् ॥ ४६२ अकथितं च–अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् ॥ ४६३ अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञः स्यादिति वाच्यम् ॥ ४६४ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ–गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात् ॥ ४६५ तत्प्रयोजको हेतुश्च–कर्तुः प्रयोजकः कर्तृसंज्ञो हेतुसंज्ञश्च स्यात् ॥

---

४६६ समासश्चान्वये नाम्नाम्–नाम्नामन्वययोग्यत्वे सत्येव समासो भवति ॥ ४६७ कृते समासे अव्ययानां पूर्वनिपातो वक्तव्यः ॥ ४६८ पूर्वेऽव्ययेऽव्ययीभावः–अव्यये पूर्वपदे सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति ॥ ४६९ समासप्रत्यययोः–समासे वर्तमानाया विभक्तेः प्रत्यये परे च विभक्तेर्लुग्भवति ॥ ४७० स नपुंसकम्–सोऽव्ययीभावः समासो नपुंसकलिङ्गो भवति ॥ ४७१ अव्ययीभावात्–अव्ययीभावात्परस्या विभक्तेर्लुग्भवति ॥ ४७२ अत्यादयः क्रान्ताद्यर्थे द्वितीयया–क्रान्ताद्यर्थे वर्तमाना अत्यादयो द्वितीयया सह समस्यन्ते स तत्पुरुषसंज्ञकः समासो भवति ॥ ४७३ ह्रस्वादेशे संध्यक्षराणामिकारोकारौ च वक्तव्यौ ॥४७४ यथाऽसादृश्ये–यथाशब्दोऽसादृश्ये वर्तमानः समस्यते सोऽव्ययीभावः समासो भवति ॥ ४७५ अतोऽमनतः–अकारान्तादव्ययीभावात्परस्या विभक्तेरम् भवति अतं वर्जयित्वा ॥ ४७६ वा टाङ्योः–टाङि इत्येतयोर्वा अम् भवति ॥ ४७७ अवधारणार्थे यावति च–अवधारणार्थे यावच्छब्दे प्रयुज्यमाने अव्ययपूर्वपदाभावेऽपि योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति ॥ ४७८ यावदवधारणे–अवधारणार्थे यावच्छब्दो नित्यं समस्यते ॥ ४७९ आङ् मर्यादाऽभिविध्योः–मर्यादायामभिविधौ च आङ् वा समस्यते ॥ ४८० पारे मध्ये षष्ठ्या वा–पारमध्यशब्दौ षष्ठ्या वा समस्येते ॥ ४८१ प्रथमानिर्दिष्टं समास उपसर्जनम्–समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ॥ ४८२ उपसर्जनं पूर्वम्–समासे उपसर्जनं प्राक् प्रयोज्यम् ॥ ४८३ अमादौ

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तत्पुरुषः–द्वितीयाद्यन्ते पूर्वपदे सति योन्वयः स तत्पुरुषसंज्ञकः समासो भवति॥४८४ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः–अन्वये सति समस्यते स तत्पुरुषः ॥४८५ क्वचिदमाद्यंतस्य परत्वम् ॥ ४८६ पिशाचादेः सभार्दीनां नपुंसकत्वं वा ॥ ४८७ संज्ञायां वा ॥ ४८८ पानस्य वा ४८९ नञि–नञि पूर्वपदे सति योऽन्वयः स तत्पुरुषसंज्ञकः समासो भवति ॥ ४९० नञ्– नञ् सुवन्तेन समस्यते ॥ ४९१ ना–समासे सति नञोऽकारादेशो भवति नाकादिवर्जम् ॥ ४९२ अन् स्वरे–समासे सति नञोऽनादेशो भवति स्वरे परे ॥ ४९३ अनादेशोऽपदांतवद्वा च्यः ॥ ४९४ चार्थे द्वंद्वः–समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थास्तेषु चार्थेषु द्वंद्वसमासो भवति ॥ ४९५ द्वन्द्वेऽल्पस्वरप्रधानेऽकारोकारान्तानां पूर्वनिपातो वक्तव्यः ॥ ४९६ देवताद्वंद्वे पूर्वपदस्य वा दीर्घो वक्तव्यः ॥ ४९७ अग्न्यादेः सोमादीनां षत्वं वक्तव्यम् ॥ ४९८ एकव-द्भावो वा समाहारे वक्तव्यः ॥ ४९९ अन्यादीनां विभक्ति लोपे कृते पूर्वपदस्य सगागमो व-क्तव्यः ॥ ५०० एकत्वे द्विगुद्वंद्वौ–एकत्वे वर्तमानौ द्विगुद्वंद्वौ नपुंसकलिङ्गौ भवतः ॥

५०१ संख्यापूर्वो द्विगुः–संख्यापूर्वः समासो द्विगुर्निगद्यते॥५०२ समाहारेऽत ईप् द्विगुः– समाहारेऽर्थे द्विगुः समासो भवति ततोऽकारान्ताद्दाप् प्रत्ययो भवति ॥ ५०३ पात्राद्यन्तो द्वि-गुर्नेवन्तः ॥ ५०४ बहुव्रीहिरन्यार्थे–अन्यपदार्थप्रधानो यः समासः स बहुव्रीहिसंज्ञको भवति ॥ ५०५ तेन सहेति तुल्ययोगे–सहेत्येतत्तृतीयान्तेन समस्यते स तुल्ययोगबहु व्रीहिः ॥ ५०६ सहादेः सादिः–सहादीनां सादिर्भवति ॥ ५०७ बहुव्रीहौ विशेषणसप्तम्यन्तयोः पूर्वनिपातो वक्तव्यः ॥ ५०८ प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ वक्तव्यौ ॥ ५०९ क्तक्तवतू निष्ठा–क्तक्तवतू प्रत्ययौ निष्ठा संज्ञौ स्तः ॥५१० प्रियादीनां वा ५११ इन्द्वादिभ्यश्च–इन्द्वादि-भ्यः शब्देभ्यः सप्तम्यन्तस्य पूर्वनिपातो न ॥ ५१२ प्रजामेधयोरसुक्–नञ्दुसुभ्यः प्रजामेधयो र्नित्यमसुक्स्याद्बहुव्रीहौ ॥ ५१३ धर्मादनिच् केवलात्–केवलात्पूर्वपदात्परो यो धर्मशब्दस्त-दन्ताद्बहुव्रीहेरनिच्प्रत्ययः स्यात् ॥ ५१४ जायाया निङादेशो बहुव्रीहौ वक्तव्यो यलोपश्च ५१५ उत्पूतिसुसुरभिभ्यो गन्धशब्दस्येकारान्तादेशो बहुव्रीहौ वक्तव्यः ॥ ५१६ आगन्तुकस्यै कवचनान्तस्य वा ॥ ५१७ अल्पाख्यायां च ॥५१८ उपमानाच्च ॥५१९ ऊधसोऽनङ्–ऊधो-न्ताद्बहुव्रीहेरनङादेशः स्यात्स्त्रियाम् ॥ ५२० धनुषश्च ॥ ५२१ संज्ञायां वा ॥ ५२२ पुंवद्वा– समासे सति समानाधिकरणे पूर्वस्य स्त्रीलिङ्गस्य पुंवद्वा भवति ॥ ५२३ अन्यार्थे–स्त्रीलिङ्गस्या-न्यार्थे वर्त्तमानस्य ह्रस्वो भवति ॥ ५२४ यङ्मानिनत्वशसंततरादौ चारूप्ये ५२५ प्रियादौ न ॥ ५२६ ऊप्रत्ययान्तस्य च न पुंवत् ॥ ५२७ अभाषितपुंस्कस्य च न पुंवत् ॥ ५२८ कोप-दपूरणीसंज्ञानां च न पुंवत् ॥ ५२९ जातिवाचकात्स्वाङ्गवाचकाच्च ईप्रदन्तस्य न पुंवदमा-निनि ॥ ५३० युङ्वर्जितरक्तविकारार्थवर्जिततद्धितान्तस्य न पुंवत् ॥ ५३१ गोः–गोशब्द स्यान्यार्थे वर्तमानस्य ह्रस्वो भवति ॥ ५३२ संख्यासुप्याद्यादिपूर्वस्य पादशब्दस्याकारस्य लोपो वक्तव्यः ॥ ५३३ टाड्काः–समासे सति टअड्क इत्येते प्रत्यया भवन्ति ॥ ५३४

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नो वा– नान्तस्य पदस्य टेर्लोपो वा भवति स्वरे यकारे च परे ॥ ५३५ रात्राह्नाहाःपुंसि–ए ते पुंस्ये व स्युः ॥ ५३६ अहोरात्रमित्यत्र नपुंसकत्वं वा वक्तव्यम् ॥ ५३७ कर्मधारयस्तुल्यार्थे– पदद्वयतुल्यार्थे एकार्थनिष्ठत्वे सति कर्मधारयसंज्ञकः समासो भवति ॥ ५३८ पुंसः खपे ख्यावर्जिते च अम्परे संयोगान्तस्यालोपो वक्तव्यः॥ ५३९ नाम्नश्च कृता समासः–प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन समासः स तत्पुरुषसंज्ञको भवति ॥

* सहसंतिरसां सध्रिसमितिरयः ॥

५४० कुगतिप्रादयः–कुशब्दो गतिसंज्ञाः प्रादयश्च समर्थेनान्वये समस्यन्ते स तत्पुरुषः ॥ ५४१ कुत्सितेषदर्थयोः–कुत्सितेषदर्थयोर्वर्तमानस्य कुशब्दस्य का कव कत् इत्येते आदेशा भवन्ति तत्पुरुषे न तु बहुव्रीहौ ॥ ५४२ काकवकदुष्णे–उष्णशब्दे परे कुशब्दस्य का कव-कत् इत्येते आदेशा भवन्ति ॥ ५४३ पुरुषे वा–पुरुषशब्दे परे कुशब्दस्य वा कादेशो भवति तत्पुरुषे ॥ ५४४ षष उत्वं दधोर्डढौ–षष उत्वं दतृदशदासूत्तरपदादेः ष्टुत्वं च धासु वा भवतीति वाच्यम् ॥ ५४५ विभक्तिलोपे कृते दन्तस्य दत् ॥ ५४६ तङ्कृतोः करपत्योश्चौरदेवतयोः सुट् तलोपश्च ॥ ५४७ महतष्टेराकारो भवति समानाधिकरणे ॥ ५४८ द्विवोद्यावा–दिव्शब्दस्य द्यावादेशो भवति ॥ ५४९ अलुक् क्वचित्–समासे तद्धिते कृदन्तेऽपि विभक्तेरलुग्भवति ॥ ५५० समासे समानाधिरणे शाकपार्थिवादीनां मध्यमपदलोपो वक्तव्यः ॥ ५५१ आदेश्च द्वंद्वे– द्वंद्वसमासे सति आदिपदस्य लोपो भवति ॥ ५५२ ऋतां द्वंद्वे–ऋकारान्तानां द्वंद्वसमासे सति पूर्वपदस्य वा आकारो भवति ॥ ५५३ द्वंद्वे सर्वादित्वं वा ॥ ५५४ व्यधिकरणे बहुव्रीहौ मध्यमपदलोपो वक्तव्यः ५५५ उपमानाच्च–उपमानाद्गंधशब्दस्येकारः स्यात् ॥ ५५६ दिक्संख्ये संज्ञायाम्–दिग्वाचकसंख्यावाचकशब्दावुत्तरपदतुल्यार्थौ संज्ञायां समस्यते स तत्पुरुषः ॥

---

५५७ अपत्येऽण्–नाम्नोऽपत्येऽर्थेऽण् प्रत्ययो भवति ॥ ५५८ आदिस्वरस्य ञ्णिति च वृद्धिः– स्वराणां मध्ये य आदिस्वरस्तस्य वृधिर्भवति ञिति णिति च तद्धिते परतः ॥ ५५९ केऽव्यस्वरे–उकारस्य ओकारस्य च अव् भवति स्वरे यकारे च परे ॥ ५६० ऋ उरणि–ऋकारस्य उर् भवति अणि परे ॥ ५६१ अत इञनृपे–अकारान्तान्नाम्नोऽनृपिशब्दादपत्येऽर्थे इञ्प्रत्ययो भवति ॥५६२ बह्वादेश्च–बह्वादेः पर इञ्प्रत्ययो भवत्यपत्यर्थे ॥ ५६३ ण्यायनणेयण्णीया गर्गनडात्रिस्त्रीपितृष्वस्रादेः–गर्गादेर्नडादेरत्र्यादेः स्त्रीलिङ्गात्पितृष्वस्रादेश्च ण्य अयनण् एयण् र्णीय इत्येते प्रत्यया भवन्ति अपत्येऽर्थे यथासंख्येन ॥ ५६४ मातृपितृभ्यां स्वसा–मातृपितृभ्यां शब्दाभ्यां परस्य स्वसृशब्दस्य सकारस्य षकारः स्यात्समासे सति ॥ ५६५ ढकि लोपः–मातृष्वसुरन्तस्य लोपः स्याड्ढकि ॥ ५६६ आयनेयीनायियः फढखछघां प्रत्ययादीनाम्–प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः ॥ ५६७ किति च–किति तद्धिते परे अचामादेरचो वृद्धिः स्यात् ॥ ५६८ मातृष्वसुश्च–पितृष्वसुर्यदुक्तं तदस्यापि स्याद् ॥

P. P. Ac. Gunratansuriji M.S.

Jin Gun Aaradhak Trust

५६९ मातृपितृभ्यां पितरि डामहच्–आभ्यां परो डामहच् प्रत्ययो भवति ॥ ५७० लुग्बहुत्वे क्वचित्–अपत्येऽर्थे उत्पन्नस्य प्रत्ययस्य बहुत्वे सति क्वचिदनृषिविषये ऋषिविषये च लुग्भवति॥ ५७१ भृग्वत्रिकुत्साङ्गिरोवसिष्ठगोतमदेशतुल्याख्यक्षत्रियेभ्यः परस्य प्रत्ययस्य लुग्भवति॥ ५७२ देवतेदमर्थे–देवतार्थे इदमर्थे चोक्ताः प्रत्यया भवन्ति ॥

५७३ क्वचिद्द्वयोः–क्वचित्पूर्वोत्तरपदादेरचो वृद्धिर्भवति ञितिणिति च तद्धिते परे॥ ५७४ णितो वा–उक्ता वक्ष्यमाणाश्च प्रत्यया विषयान्तरे णितो वा भवन्ति ॥ ५७५ चतुरश्च लोपो ण्यर्णाययोः–चतुर्शब्दस्य चकारस्य लोपो भवति ण्यणीययोः प्रत्यययोः परतः॥५७६ पूरणेऽर्थे ण्यणीयौ भवतः ॥ ५७७ अन्यस्य दुक्–अन्यशब्दस्य दुगागमो भवति णीयप्रत्यये परे ॥ ५७७ ५७८ स्वपरयोः कक् ॥ ५७९ कारकात्क्रियायुक्ते–कारकादण्येते अणादयः प्रत्यया भवन्ति क्रियायुक्ते कर्तरि कर्मणि चाभिधेये ॥ ५८० केनेयेकाः–क ईन इय इक एते प्रत्यया भवन्ति भवाद्यर्थेषु ॥ ५८१ यलोपश्च–कन्यादीनामन्त्ययकारस्य लोपो भवति यकारे स्वरे परे। कन्यादीनामुपधायाः क्वचिद्यकारस्य लोपो भवति स्वरे यकारे च तद्धिते परे ॥ ५८२ नक्षत्रादण् वक्तव्यः ॥ ५८३ इयो वा–क्षत्रशब्दाद्वा इय प्रत्ययो भवति ॥ ५८४ क्षत्रशब्दादण् वक्तव्यः ॥ ५८५ त्यतनौ–किमादेरव्ययादेर्भवाद्यर्थे त्यतनौ प्रत्ययौ भवतः ॥ ५८६ चिरादिभ्यस्त्नः–चिरपरुपरादिभ्यस्त्नो भवाद्यर्थे ॥ ५८७ स्वार्थेऽपि–उक्ताः प्रत्ययाः स्वार्थेऽपि भवन्ति ॥ ५८८ अव्ययसर्वनाम्नामकच् प्राक् टेः–अव्ययस्य सर्वादेश्चांत्यस्वरात्पूर्वोऽकच्प्रत्ययो भवति ॥ ५८९ अणीनयोर्युष्मदस्मदोस्तवकादिः–अणीनयोः प्रत्यययोः परतो युष्मदस्मदोस्तवकादय आदेशा भवन्ति ॥ ५९० वतुल्ये–तुल्ये सादृश्येऽर्थे वतुः प्रत्ययो भवति ॥ ५९१ भावे तत्वयणः–शब्दस्य प्रवृत्तिनिमित्तं भावः तस्मिन् भावे तत्वयण् इत्येते प्रत्यया भवन्ति ॥ ५९२ समाहारे ता च त्रैगुणश्च ॥ ५९३ अचित्तवाचकादिकः ॥ ५९४ कवचिनशब्दादिकः ॥ ५९५ गणिकाया ण्यः॥ ५९६ केदाराण्यञ् च ॥ ५९७ युवत्यादेरण् ॥ ५९८ पाशादिभ्यो यः ॥ ५९९ खलगोरथेभ्य इनित्रकट्याः ॥ ६०० कर्मण्यपि यण् वक्तव्यः ॥ ६०१ समानस्य वा स इत्यादेशः ॥ ६०२ लोहितादेर्डिदिमन्–लोहितादेर्गणाद्भावेऽर्थे इमन् प्रत्ययो भवति स इमन् डित्संज्ञो भवति ॥ ६०३ इमनि लोपः –इमनि प्रत्यये परे वकारस्य लोपो भवति ॥ ६०४ ऋ र इमनि–इमनि प्रत्यये परे हसादेर्लघो ऋकारस्य रो भवति ॥ ६०५ बहोरिलोपो भू च बहोः–बहोरुत्तरेषामिमनादीनामिकारस्य लोपो भवति बहोः स्थाने भू चादेशः ॥ ६०६ अस्त्यर्थे मतुः–नाम्नो मतुः प्रत्ययो भवति अस्यास्मिन्वास्तीत्येतस्मिन्नर्थे ॥ ६०७ फलबर्हरथेभ्य इनेनौ वा वक्तव्यौ ॥ ६०८ बलवाताभ्यामूलः ॥ ६०९ वातातिसाराभ्यां किन् ॥ ६१० ऊर्णाहंशुभंभ्यो युः ॥ ६११ अर्णःकेशयोर्वः ॥ ६१२ शंकंभ्यां बभयुस्तितुतयसः–आभ्यामेते प्रत्ययाः स्युरस्त्यर्थे ॥ ६१३ लोमादिभ्यः शः ॥ ६१४ पामादेर्नः ॥ ६१५ पिच्छादेरिलच् ॥ ६१६ फेनादिभ्य इलच् ॥ ६१७ तुन्दिवलिवटिभ्यो भः ॥ ६१८ कृष्यादिभ्यो वलच् दीर्घश्च ॥ ६१९ प्रज्ञार्चाश्रद्धावृत्तिभ्योऽण्॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

६२० शृङ्गवृन्दाभ्यामारकन् ॥ ६२१ मध्वादेरः ६२२ सिध्मादेर्लः ॥ ६२३ अइकौ च मत्वर्थे-मत्वर्थे अइकौ प्रत्ययौ भवतः ॥ ६२४ मन्तोपधाद्वत्विनौ-मकारान्तान्मकारोपधादकारान्तादकारो तथाच्च वत्विनौ प्रत्ययौ भवतः अस्त्यर्थे ॥ ६२५ तडिदादिभ्यश्च-तडिदादिभ्यः शब्देभ्यो वतुप्रत्ययो भवति ॥ ६२६ तकारान्तस्य सकारान्तस्य हसादावस्त्यर्थे प्रत्यये परे अपदान्तता वक्तव्या ॥ यस्वरादौ प्रत्ययमात्रे परे सर्वेषामपदान्तता भवति ईये परे पदान्तता ॥ ६२७ एतत्कियत्तद्भ्यः परिमाणे वतुः-एतत्कियत्तद्भ्यः शब्देभ्यः परिमाणेऽर्थे वतुप्रत्ययो भवति ॥ ६२८ यत्तदोष्टेरा-यत्तदोष्टेरात्वं भवति वतौ परे ॥ ६२९ किमः कियश्च-किम्शब्दस्य कियादेशो भवति वतोर्वकारस्य यकारादेशो भवति ॥ ६३० आ इश्चैतदो वा-एतदष्टेर्वा आत्वं भवति वतौ परे ॥ ६३१ तुन्दादेरिलः-तुन्दादेर्गणात् इलप्रत्ययो भवति ॥ ६३२ औन्नत्ये दन्तादुरः-औन्नत्येऽर्थे वाच्ये सति दन्तशब्दादुरः प्रत्ययो भवति ॥ ६३३ श्रद्धादेर्लुः ॥ ६३४ सिध्मादेर्लः ॥ ६३५ अस्मायामेधास्रग्भ्योऽस्त्यर्थे विनिर्वक्तव्यः ॥ ६३६ वाचो ग्मिनिः-वाच् शब्दात् ग्मिनिः प्रत्ययो भवति अस्त्यर्थे ॥ ६३७ एकादाकिनिच्चासहाये ॥ ६३८ आलाटौ कुत्सितभाषिणि-कुत्सितभाषिण्यर्थे वाच्ये सति आलाटौ प्रत्ययौ भवतः ॥ ६३९ लः समाहारप्रकृष्टयोः-नाम्नः समाहारप्रकृष्टयोर्विषये लः प्रत्ययो भवति ॥ ६४० ईषदपरिसमाप्तौ कल्पदेश्यदेशीयाः ॥ ६४१ प्रशंसायां रूपः-प्रशंसायां रूपः प्रत्ययो भवति ॥ ६४२ पाशः कुत्सायाम्- कुत्सायां वाच्यायां सत्यां पाशः प्रत्ययोः भवति ॥ ६४३ भूतपूर्वे चरट्-भूतपूर्वेऽर्थे वाच्ये सति चरट् प्रत्ययो भवति ॥ ६४४ प्राचुर्यविकारप्राधान्यादिषु मयट् प्रत्ययो भवति ६४५ गोः पुरीषे च ॥ ६४६ तदधीते वेद वेत्यत्राण् वक्तव्यः-तदधीतेऽथवा वेद इत्यत्रार्थे द्वितीयान्तान्नाम्नोऽण् वक्तव्यः ॥ ६४७ न्यासादेः किः ॥ ६४८ सुधातुरकङ् च ॥ ६४९ न संधिय्वोयुट् च-सन्धिजयोर्यकारवकारयोः संबन्धिनः स्वरस्य वृद्धिर्न भवति किंतु तयोर्युडागमो भवति तेन इयुट् उवुट् इत्येतावागमौ भवतः ॥ ६५० चटकादेरण् ॥ ६५१ कल्याण्यादीनामिनेयः ॥ ६५२ इतो जातार्थे-जातार्थे इतः प्रत्ययो भवति ॥ ६५३ तरतमेयस्विष्ठाः प्रकर्षे ॥ ६५४ ईयस्विष्ठौ ङितावितिवक्तव्यौ ॥ ६५५ विन्मतुवतुतृप्रत्ययानां लोपश्च इष्ठादौ ॥ ६५६ गुर्वादेरिष्ठेमेयस्सु गरादिष्टयलोपश्च-इष्ठेमेयस्सु परतो गुर्वादेर्गरादिरादेशो भवति टेर्लोपश्च ॥ ६५७ ईलोपो ज्याशब्दादीयसः-ज्याशब्दादीयस ईकारस्य लोपो भवति ॥ ६५८ बहोरिष्ठे यिः-बहुशब्दात्परस्य इष्ठे वर्तमानस्येकारस्य यिर्भवति ईयस ईकारस्य लोपश्च ॥ ६५९ किमोऽव्ययादाख्याताच्च तरतमयोराम् वक्तव्यः ६६० परिमाणे दघ्नादयः-परिमाणेऽर्थे वाच्ये सति दघ्नट् द्वयसट् मात्रट् इत्येते प्रत्यया भवन्ति ॥ ६६१ द्वयोर्बहूनां चैकस्य निर्धारणे किमादिभ्यो डतरडतमौ वक्तव्यौ ॥ ६६२ संख्येयविशेषावधारणे द्वित्रिभ्यां तीयः ॥ ६६३ त्रेः संप्रसारणं सस्वरस्य ॥ ६६४ षट्चतुरोः स्थः ॥ ६६५ पञ्चादेर्मः ॥ ६६६ एकादशादेर्डः ॥ ६६७ द्व्यष्टैकानां द्वात्रयोऽष्टैकाः ॥ ६६८ विंशत्यादेर्वा तमट् ॥ ६६९ विंशतेस्तिलोपः ॥ ६७० चत्वारिंशदादौ वा ॥ ६७१ शतादेर्नित्यम् ॥ ६७२ कतिकतिपयाभ्यां

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

थः । ६७३ संख्यायाः प्रकारे धा–संख्यावाचकाच्छब्दात्प्रकारेऽर्थे वाच्ये सति धा प्रत्ययो भवति ॥ ६७४ गुणोऽण् च–धाप्रत्ययान्तस्य शब्दस्य गुणो वा भवति अण् च वा भवति ॥ ६७५ एकाद् ध्यमुञ् वा ॥ ६७६ क्रियाया आवृत्तौ कृत्वसुच् ॥ ६७७ द्वित्रिचतुर्भ्यः सुः–द्वित्रिचतुःशब्देभ्यः सुप्रत्ययो भवति ॥ ६७८ बह्वादेः कारकाच्छस्–बह्वादेः शब्दाच्छस् प्रत्ययो भवति ६७९ तयायटौ संख्याया अवयवे–संख्याया अवयवे वाच्ये सति तयायटौ प्रत्ययौ भवतः ॥ ६८० अल्पार्थे कुटीशमीशुंडाभ्यो रः ॥ ६८१ स्त्रीपुंसोर्नण्स्नणौ ॥

---

६८२ धातोः वक्ष्यमाणाः प्रत्ययाः धातोर्ज्ञेयाः ॥ ६८३ भ्वादिः–भूसत्तायामित्यादिगणो धातुसंज्ञो भवति ॥ ६८४ आदनुदात्तङितः–अनुदात्तेतो ङितश्च धातोरादित्यात्मनेपदं भवति ॥ ६८५ ञित्स्वरितेतश्च उभे–ञितः स्वरितेतश्च धातोरात्मनेपदपरस्मैपदे भवतः ॥ ६८६ परतोऽन्यत्–पूर्वोक्तनिमित्तविधुरादन्यस्माद्धातोः परस्मैपदं भवति ॥ ६८७ नव परस्मैपदानि–तिबादीनामष्टादशसंख्याकानामाद्यानि नव वचनानि परस्मैपदसंज्ञानि भवन्ति ॥ ६८८ वर्त्तमाने–प्रारब्धापरिसमाप्तक्रियोपलक्षितः कालो वर्त्तमानस्तस्मिन्नभिधेये तिबादयः प्रत्यया भवन्ति ॥ ६८९ नाम्नि च युष्मदि चास्मदि च भागैः–नामादिषूपपदेषु प्राप्तेषु सत्सु त्रिभिर्भागैरेते प्रत्यया भवन्ति ॥ ६९० कर्तरि पं च–परस्मैपदं कर्तरि भवति ॥ ६९१ अप् कर्तरि–धातोरप् प्रत्ययो भवति कर्तरि विहितेषु त्यादिषु चतुर्षु दिप्पर्यंतेषु परतः ॥ ६९२ गुणः–धातोरन्त्यभूतस्य नामिनो गुणो भवति अवादेशश्च भवति ॥ ६९३ अपिच्चादिर्ङित्–पकारेतं तादिकं च विहायान्यः प्रत्ययो ङित्संज्ञो भवति ॥ ६९४ क्ङित्युद्व्युसि–किति ङिति च परे धातोर्गुणो न भवति द्व्युसं वर्जयित्वा ॥ ६९५ अदे–अकारस्य लोपो भवति अकारे एकारे च परे ॥ ६९६ व्मोरा–अकारस्य आत्वं भवति । वकारे मकारे च परे ॥ ६९७ अव्यवधानाच्च पुरुषविशेषः–यस्य क्रियापदेन व्यवधानं नास्ति ततः पुरुषविशेषः ॥ ६९८ आदाथ ई–आकारात्परस्य आत् आथ् संबंधिन आकारस्य ईकारो भवति ॥ ६९९ विधिसंभावनयोः–विधिः कर्तव्यार्थोपदेशः संभावनं कल्पनमूहस्तत्र यादादयः प्रत्यया भवन्ति ॥ ७०० या ई–अकारात्परो या ई भवति ॥ ७०१ युस इट्–अकारात्परस्य युस इडागमो भवति ॥ ७०२ यामियम्–अकारात्परो यामियं भवति ॥ ७०३ आशीःप्रेरणयोः–तत्र तुबादयः प्रत्ययाः भवन्ति ॥ ७०४ तुह्योस्तातङ्ङाशिषि वा वक्तव्यः ॥ ७०५ अतः–अकारात्परस्य हेर्लुग्भवति न तु तातङः ॥ ७०६ अनद्यतनेऽतीते–अतीताया रात्रेर्यामद्वयादर्वाग्यावदागामिन्याः प्रथमयामद्वयं सोऽद्यतनस्ततोऽन्योऽनद्यतनस्तस्मिन्ननद्यतनेऽतीते काले दिबादयः प्रत्यया भवन्ति ॥ ७०७ दिबादावट्–दिबादौ परे धातोरडागमो भवति ॥ ७०८ परोक्षे–धातोः परोक्षेऽतीते काले णवादयः प्रत्यया भवन्ति ॥ ७०९ णादिः कित्–अपित् णादिः किद्भवति ॥ ७१० द्विश्च–णबादिसंयोगे धातोर्द्विवचनम् ॥ ७११ सस्वरादिर्द्विरद्विः–सस्वराद्योऽ

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वयवोऽद्विरुक्तो द्विर्भवति ॥ ७१२ आम्वोर्णादौ–पूर्वस्याकारस्य भूशब्दस्य च आकारो भवति णादौ सति ॥ ७१३ ह्रस्वः– पूर्वसंबंधिनो दीर्घस्य ह्रस्वो भवति ॥ ७१४ झपानां जबचपाः– पूर्वसंबन्धिनां झपानां जबाश्चपाश्च भवन्ति ॥ ७१५ भुवो वुक्–भुवो वुगागमो भवति णादौ स्वरे परे ॥ ७१६ क्रादेर्णादेः–कृसृभृवृद्रुश्रुस्रुस्तु इत्येतस्मात्परस्य वसादेर्णादिर्गणस्येट् न भवत्यन्यस्माद्भवतीति नियमादनिटोऽपीडागमः ॥ ७१७ नामिनोऽचतुर्णां धो ढः–नाम्यन्ताद्धातोरुत्तरस्य तिबादिचतुष्कव्यतिरिक्तस्य लिङो लुङ्लिटोश्च धस्य ढो भवति ॥ ७१८ आशिषि–धातोराशिषि यादादयो भवन्ति ॥ ७१९ आशीर्वादादेः पं किदिति वक्तव्यम् ॥ ७२० सिसतासीस्यपामिट्–धातोः परेषां सिसतासीस्यप् इत्येतेषामिडागमो भवति ॥ ७२१ श्वस्तने–श्वो आगतेऽह्नि भाविन्यर्थे तादयो भवन्ति ॥ ७२२ स्यादौ भविष्यति स्यप्–धातोर्भविष्यतिकाले स्यप् प्रत्ययो भवति तिबादिष्वष्टादशसु परेषु ॥ ७२३ स्यप् क्रियातिक्रमे–धातोः क्रियाया अतिक्रमे कुतश्चिद्वैगुण्यादनिष्पत्तौ सत्यां दिवादिपरः स्यप् प्रत्ययो भवति भविष्यर्थे क्वचिद्भूतेऽपि ॥ ७२४ भूते सिः–धातोर्भूतमात्रे काले सिः प्रत्ययो भवति दिबादिपरः ॥ ७२५ दादेः पे– परस्मैपदे परे अपित् दाधास्थेण्भूपिबतिभ्यः परस्य सेर्लोपो भवति ॥ ७२६ शाच्छासाघ्राधेटो वेति वक्तव्यम् ॥ ७२७ भुवः सिलोपो लुग्वाच्यः ॥ ७२८ भुवः सिलोपे स्वरे वुग्वक्तव्यः ॥ ७२९ आतोऽन्तोऽदनतः–आत् आत्मनेपदस्यान्त इत्येतस्याद्भवति अकारादुत्तरस्य तु न ॥ ७३० ध्वे च सेर्लोपः–ध्वे परे सेर्लोपो भवति सस्य वा द इति केचित् ॥ ७३१ माङि लुङेव वक्तव्यः ॥ ७३२ मेटः–माशब्दे प्रयुज्यमाने अटो लोपो भवति ॥ ७३३ स्मयोगे भूतार्थता वक्तव्या ॥ ७३४ मास्मयोगे लङ् च ॥ ७३५ उपधाया लघोः–धातोरुपधाया लघोर्नामिनो गुणो भवति ॥ ७३६ सेः–सिशब्दात्परयोर्दिस्योरिडागमो भवति ॥ ७३७ इट ईटि–इट उत्तरस्य सेर्लोपो भवति ईटिपरे ॥ ७३८ स्याविदः–सेराकारान्ताद्विदश्चोत्तरस्यान उस् भवति ॥ ७३९ पूर्वस्य हसादिः शेषः–पूर्वस्यादिर्हस् शिष्यते अन्यो लुप्यते ॥ ७४० इरितो वा–इरितो धातोर्वाङः प्रत्ययो भवति दिवादिपरः परस्मैपदे ॥ ७४१ शसात् खपाः–द्विर्वचनेकृते यत्पूर्वरूपं तस्य शसादुत्तराः खपाः शिष्यन्ते न शसाः ॥ ७४२ नो लोपः–धातोरूपधाभूतस्य नकारस्य लोपो भवति किति ङिति च परे ॥ ७४३ ऋसंयोगात् णादेरकित्त्वं वाच्यम् ॥ ७४४ केचित्संयोगाद्वेति वाच्यम् ॥ ७४५ इदितो नुम्–इदितो धातोर्नुमागमो भवति ॥ ७४६ कुहोश्चुः–पूर्वसंबंधिनोः कवर्गहकारयोश्चुत्वं भवति ॥ ७४७ इदितो न लोपाभावो वाच्यः ॥ ७४८ आदेष्णः स्नः–षोपदेशस्य णोपदेशस्य च धातोरादौ वर्तमानयोः षकारणकारयोः सकारनकारौ भवतः ॥ ७४९ नामधातुष्ट्यष्वष्कष्ठिवां षः सो नेति वाच्यम् ॥ ७५० प्रादेश्च तथा तौ सुनमाम्–प्रादेरुपसर्गात्परेषां स्वादीनां नमादीनां च धातूनां सकारनकारयोस्तौ पूर्वभाविनावेव षकारणकारौ भवतः षत्वणत्वनिमित्ते सति ॥ ७५१ ऊदितो वा–ऊदितो धातोः परस्य वसादेरिड्वा भवति ॥ ७५२ स्तूसूतिसूयतिधूञ्रधादीनामिड्वा वक्तव्यः ॥ ७५३ तथोर्धः–दधाति

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विना झभान्ताद्धातोः परयोस्तकारथकारयोर्धकारादेशो भवति ॥ ७५४ अनिटो नामिवतः–नामिवतोऽनिटो धातोः परस्मैपदे परे सिप्रत्यये वृद्धिर्भवति ॥ ७५५ प्रत्ययलोपे प्रत्ययलक्षणं कार्यं भवति ॥ ७५६ झसात्–झसादुत्तरस्य सेर्लोपो भवति झसेपरे ॥ ७५७ अत उपधायाः–धातोरुपधाया अकारस्य वृद्धिर्भवति ञिति णिति च परे ॥ ७५८ णलुत्तमो वा णिद्वक्तव्यः ॥ ७५९ णित्पे–परस्मैपदे परे सिर्णिद्भवति ॥ ७६० हसादेर्लघ्वकारोपधस्य वा वृद्धिः सेटि सौ वाच्या ॥ ७६१ उपसर्गस्थनिमित्तान्नेर्गदादौ णत्वं वाच्यम् ॥ ७६२ लोपः पचां कित्ये चास्य–पचादीनामनादेशादीनां किति णादौ सति पूर्वस्य लोपः–असंयुक्तहसयोर्मध्यस्थस्याकारस्यैकारः॥ ७६३ सेटि थपि एत्वपूर्वलोपौ वक्तव्यौ ॥ ७६४ नुगशाम्–अश्नोतेर्ऋकारादिधातूनां संयोगान्ताकारादिधातूनां च पूर्वस्य नुगागमो भवति णादौ सति ॥ ७६५ स्वरादेः–स्वरादेर्धातोर्द्वितीयोऽडागमो भवति दिवादौ परे ॥ ७६६ कासादिप्रत्ययादाम् कृस्भूपरः–कास् आस् दय् अय् नाम्यादिगुरुमद्धात्वनेकस्वरधातुभ्यः प्रत्ययान्ताच्च णवादौ परे आम् प्रत्ययो भवति स च कृ अस् भूपरः प्रयोक्तव्यः ॥ ७६७ विद्दरिद्राकास्काश्जागृउष एभ्यो वाम् ॥ ७६८ रः–पूर्वसंबंधिन ऋकारस्याकारो भवति ७६९ धातोर्नामिनः–धातोरन्त्यभूतस्य नामिनो वृद्धिर्भवति ञिति णिति च परे ॥ ७७० निस्निक्षनिन्दामुपसर्गाण्णत्वं वा वाच्यम् ॥ ७७१ असवर्णे स्वरे पूर्वेकारोकारयोरियुवौ वक्तव्यौ ॥ ७७२ पूजायामञ्चेर्नलोपाभावो वाच्यः॥ ७७३ शस्ददवादिगुणभूताकाराणां नैत्वपूर्वलोपौ वक्तव्यौ ॥ ७७४ वदिव्रज्योः सौ नित्यं वृद्धिः॥ ७७५ अजेरार्धधातुके वी वक्तव्यः वसादौ वा ॥ ७७६ नुधातोः–विकरणस्य नोर्धातोश्चेवर्णोवर्णयोरियुवौ भवतः स्वरे परे ॥ ७७७ स्वरान्तान्नित्यानिटस्थपो वेट् ॥ ७७८ नैकस्वरादनुदात्तात्–एकस्वराद्धातोर्धातुपाठेऽनुदात इत्येवं पठितादिडागमो न भवति ॥ ७७९ ये–अनपि यकारे पूर्वस्य दीर्घो भवति ॥ ७८० ह्मचन्तक्षणश्वसिजागृहसादिवर्जं सेटि सौ न वृद्धिः॥ ७८१ आयः–गुपधूपविच्छिपणिपनिभ्यः स्वार्थे आयः प्रत्ययो भवति अनपि तु वा ॥ ७८२ स धातुः–स यङादिप्रत्ययान्तः शब्दो धातुसंज्ञो भवति ॥ ७८३ यतः–यकारस्याकारस्य च लोपो भवत्यनपि ॥ ७८४ अत्वतो नित्यानिटस्थपो वेट् ॥ ७८५ क्रमु भ्रमु त्रसि त्रुटि लष् भ्राशम्लाशो वा यः प्रत्ययो वक्तव्यः चतुर्षु ॥ ७८६ क्रमः पे चतुर्षु दीर्घता वक्तव्या ॥ ७८७ गमां छः–गम्यम्इषूणां छो भवत्यपि ॥ ७८८ आदन्तानां यमिरमिनमीनां सेरिट् सक् च पे वक्तव्यौ ॥ ७८९ गमां स्वरे–गम् हन् जन् खन् घस् एतेषामुपधाया लोपो भवति ङ्कित्यङे स्वरे ॥ ७९० हनृतः स्यपः–हन्तेर्ऋकारान्तात्स्यप इडागमो भवति गमेश्च पे ॥ ७९१ लित्पुषादेर्ङः–लितो धातोः पुषादेर्द्युतादेश्च ङप्रत्ययो भवति दिवादौ परस्मैपदे ॥ ७९२ इषुसहलुभरिषरूषामनपि तस्येड्वा वक्तव्यः ॥ ७९३ तृफलभजत्रपां किति णादौ सेटि थपि चैत्वपूर्वलोपौ वक्तव्यौ ॥ ७९४ लांतस्याकारस्य सौ नित्यं वृद्धिर्वाच्या॥ ७९५ सपरोक्षयोर्जेर्गिः–स प्रत्यये परोक्षे च जि जय इति धातोर्गिरादेशो भवति ॥ ७९६ रारो झसे दृशाम्–दृश् सृज्

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

